# MT

Seat No. | | | | | | | |

2018 .... .... 1100

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - IV**

**Time : 2 Hours** **(Pages 8)** **Marks : 50**

---

## प्रथमः विभागः - सुगमसंस्कृतम् ।

प्र.१ अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४) ४

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ |  | २ |  | ३ |  | ४ |  | ५ |  |
| | | | | | | | | | |

प्र.१ आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २) २

१. एकषष्टिः - २. ३२ -

३. ३६ -

प्र.१ इ) स्तम्भमेलनं कुरुत । (५ तः ४) २

| | अ | ब |
|---|---|---|
| १. | पञ्चत्रिंशदधिक - पञ्चवादनम् | ०८:४० |
| २. | दशाधिक - पञ्चवादनम् | ०५:३५ |
| ३. | पादोन - षड्वादनम् | ११:०० |
| ४. | चत्वारिंशदधिक - अष्टवादनम् | ०५:१० |
| ५. | एकादशवादनम् | ०५:४५ |

प्र.१ ई) वासर - तालिकां पूरयत । (केऽपि २) २

| | | | | |
|---|---|---|---|---|
| श्वः<br>__________ | → | __________<br>शुक्रवासरः | → | __________<br>शनिवासरः |

## द्वितीयः विभागः - गद्यम् ।

प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्रामः । सः ग्रामः पूर्णानदीतीरे वर्तते । अत्र जगद्गुरोः शङ्कराचार्यस्य जन्म खिस्ताब्दे अष्टमे शतके अभवत् । तस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम् । बाल्ये एव तस्य पिता शिवगुरुः दिवङ्गतः । तस्माद् मातैव पुत्रस्य पालनम् अकरोत् । पञ्चमे वयसि उपनीतः सः पठनार्थं गुरुमुपागच्छत् । तत्र वेद-वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान् । पठनादिकं समाप्य शङ्करः गृहं प्रत्यागतवान् । गृहं प्राप्य मातृसेवाम् आरभत च । माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म । परन्तु मनसा वचसा कर्मणा च विरक्तः शङ्करः संन्यासार्थम् अनुमतिं प्रार्थयत । शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता ।

१. अवबोधनम् । ( ४ तः ३ )

क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

१) ......... वयसि उपनीतः सः पठनार्थं गुरुम् उपागच्छत् । (पञ्चमे / दशमे)

२) पठनादिकं समाप्य शङ्करः ...... प्रत्यागतवान्। (गृहं / नदीं)

ख) पूर्णवाक्येन उत्तरं लिखत । १

किमर्थम् आर्याम्बा चिन्तामग्ना जाता ?

ग) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत । १

शङ्करः अतीव प्रज्ञावान् बालकः।

घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ? १

२. शब्दज्ञानम् । (३ तः २)

क) गद्यांशतः ल्यबन्त-अव्यये चित्वा लिखत । १

ख) विशेषण-विशेष्य-मेलनं कुरुत । १

| विशेषणम् | विशेष्यम् |
|---|---|
| जगद्गुरोः | आर्याम्बा |
| चिन्तामग्ना | शङ्कराचार्यस्य |
| | आचार्यः |

ग) सन्धिविग्रहं कुरुत । १

गुरुमुपागच्छत् - ............ + ............ ।

**प्र.२ आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः । यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः । नक्रः झटिति तस्य पादम् अगृह्णात् । तदा शङ्करः उच्चैः आक्रोशत्। ''अम्ब ! त्रायस्व । नक्रात् त्रायस्व !'' आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत् । भयाकुला सा अपि रोदनम् आरभत । शङ्करः मातरम् आर्ततया प्रार्थयत - ''अम्ब, इतः परम् अहं न जीवामि । मरणात् पूर्वं संन्यासी भवितुम् इच्छामि । अधुना वा देहि अनुमतिम् ।'' चेतसा अनिच्छन्ती अपि विवशा माता अवदत् - ''वत्स, यथा तुभ्यं रोचते तथैव भवतु । इदानीमेव संन्यासं स्वीकुरु । मम अनुमतिः अस्ति'' इति। तत्क्षणमेव आश्चर्यं घटितम् । दैववशात् शङ्करः नक्राद् मुक्तः । स नदीतीरम् आगत्य मातुः चरणौ प्राणमत् ।

अनन्तरं शङ्करः मातरं संन्यासस्य महत्त्वम् अवाबोधयत् । संन्यासी न केवलम् एकस्याः पुत्रः। विशालं जगद् एव तस्य गृहम् । 'मातः, यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि' इति मात्रे प्रतिश्रुत्य सः गृहात् निरगच्छत् । ततः गोविन्दभगवत्पादानां शिष्यो भूत्वा सः सर्वाणि दर्शनानि अपठत् । तेभ्यः संन्यासदीक्षां गृहीत्वा वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् अकरोत् ।

**१. अवबोधनम् । ( ४ तः ३ )**

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

शङ्कर उच्चैः आक्रोशत् यतः ..........

(अ) सः नदीजले अमज्जत् ।

(ब) नक्रः तस्य पादम् अगृह्णात् ।

**ख) कः कं वदति ।** १

'नक्रात् त्रायस्व!'

**ग) पूर्णवाक्येन उत्तरं लिखत ।** १

शङ्करः मात्रे किं प्रतिश्रुत्य गृहाद् निरगच्छत् ?

**घ) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

शङ्करः स्नानार्थं यमुनानदीम् अगच्छत् ।

२. **जालरेखाचित्रं पूरयत ।** २




**प्र.२ इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** ४

१.

(ततः प्रविशति विश्वामित्रः । नदीं प्रणम्य...)

विश्वामित्रः - कथं लङ्घनीयः प्रवाहो नदीनाम्, कथं रक्षितव्यं जनं गोधनं च ।।
कथं याचितव्यस्तरणाय मार्गः, कथं प्रार्थनीया शुभेच्छा नदीनाम् ।।

नदी (विपाट्) - कः खलु एषः मानवः ? अस्मान् किमर्थं वन्दते स्तौति च ? आर्य, किन्नामा भवान्? कस्माद् अस्मान् आह्वयति ?

विश्वामित्रः - अयि मातः, विश्वामित्रोऽहम् । दूरतः आयातः रथैः शकटैः च । वयं सर्वे परतीरं गन्तुं समुत्सुकाः ।

२.

(रङ्गमञ्चे - कीर्तनकारः कीर्तनं करोति, श्रोतृवृन्दः श्रवणे मग्नः ।)

कीर्तनकारः - गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि पृथिव्यां सन्निधिं कुरु ।।
ज्येष्ठमासे शुक्लपक्षे दशम्यां तिथौ गङ्गादशहरापर्वप्रारम्भः । अस्मिन् पर्वणि नदी-पूजनं कर्तव्यम् ।

श्रोतृवृन्दः - नदीपूजनम् ? किमर्थं नदीपूजनम् ?

कीर्तनकारः - नदी खलु जीवनदायिनी । अतः अस्मिन्नवसरे कृतज्ञतां प्रदर्शयितुं जनाः जले दीपदानं कुर्वन्ति । द्रोणे दीपं प्रज्वाल्य नदीजले समर्पयन्ति ।

**प्र.२ ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१) शङ्करेण संन्यासार्थं कथम् अनुमतिः लब्धा ?

२) विश्वामित्रः नद्यौ किं प्रार्थयते ?

## तृतीयः विभागः - पद्यम् ।

**प्र.३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

| |
|---|
| कं संजघान कृष्णः का शीतलवाहिनी गङ्गा । |
| के दारपोषणरताः कं बलवन्तं न बाधते शीतम् ।। |
| अयं न भक्तो न च पूजको वा |
| घण्टां स्वयं नादयते तथापि । |
| धनं जनेभ्यः किल याचतेऽयं |
| न याचको वा न च निर्धनो वा ।। |

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

कं शीतं न बाधते?

**ख) पद्यांशात् प्रथमाविभक्त्यन्तपदानि चित्वा लिखत ।** १

**ग) जालरेखाचित्रं पूरयत ।** १




**घ) सन्धिविग्रहं कुरुत ।** १

१) याचतेऽयम् - याचते + ............... ।

२) निर्धनो वा - ............... + वा ।

**ङ) लकारं लिखत ।** १

याचकः धनं <u>याचते</u> ।

**प्र.३ आ) श्लोकौ शुद्धौ पूर्णौ च लिखत ।** ४

१. वैद्यराज ............. च ।।

२. रामाभिषेके ............. ठठं ठः ।।

**प्र.३ इ) माध्यमभाषया सरलार्थं लिखत । (२ तः १)** २

१. यथैव सकला नद्यः प्रविशन्ति महोदधिम् ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ॥

२. षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ॥

**प्र.३ ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१. 'मानवताधर्मः' इति काव्यस्य आधारेण मानवताधर्मस्य वर्णनं कुरुत ।

२. 'रामाभिषेके जलमाहरन्त्या.....' अस्य श्लोकस्य स्पष्टीकरणं माध्यमभाषया लिखत ।

## चतुर्थः विभागः - लेखनकौशलम् ।

**प्र.४ निर्दिष्टाः कृतीः कुरुत । (३ तः २)**

**अ) उपपदविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (४ तः २)** २

१. गम् - गच्छ् →

२. दा - यच्छ् →

३. रुच् →

४. कथ् →

**आ) अनुवादं कुरुत । (४ तः २)** २

१. India is my country.

२. The colour of the sky is blue.

३. This is my favourite book.

४. Children play in the water.

**इ) अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २)** २

१. सुदामा श्रीकृष्णस्य <u>मित्रम्</u> ।

२. <u>पादपः</u> परोपकाराय फलति ।

३. <u>नरः</u> सर्वदा सत्यं वदेत् ।

४. त्वं प्रजाहितदक्षः <u>राजा</u> ।

पञ्चमः विभागः - भाषाभ्यासः ।

**प्र.५ अ) पृथक्करणम् ।**

**१. नामानि सर्वनामानि च पृथक्कुरुत । (५ तः ४)** २

( पत्रवाहकः, तस्य, युष्मान्, नक्रात्, जनित्रम् )

| नाम | सर्वनाम |
|---|---|
| | |

**२. क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत । (५ तः ४)** २

( वन्द्यः, अवदत्, तिष्ठ, कृतवान्, पूजितः )

| क्रियापदम् | धातुसाधित-विशेषणम् |
|---|---|
| | |

**प्र.५ आ) निर्दिष्टाः कृतीः कुरुत । (४ तः २)**

**१) सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत । (३ तः २)** २

१. भगवता व्यासेन ............ पुराणानि रचितानि । (अष्टादश / अष्टवारम्)

२. भगवद्गीतायाम् अष्टादशे अध्याये ............ श्लोकाः सन्ति । (अष्टसप्ततिः / अष्टमः)

३. ............ वेदाः वर्तन्ते । (चत्वारः / चतुरः)

**२) समासविग्रहानां समासनामभिः सह मेलनं कुरुत । (६ तः ४)** २

| | समासविग्रहाः | समासनामानि |
|---|---|---|
| १. | दारपोषणे रताः । | अव्ययीभावः समासः । |
| २. | यमराजस्य सहोदरः । | उपपद - तत्पुरुषः समासः । |
| ३. | नीलः कण्ठः यस्य सः । | कर्मधारयः समासः । |
| ४. | मानवता एव धर्मः । | बहुव्रीहि समासः । |
| ५. | परिवारेण सह । | सप्तमी - तत्पुरुषः समासः । |
| ६. | अभ्युदयं करोति इति । | षष्ठी - तत्पुरुषः समासः । |

**३) समानार्थकं - विरुद्धार्थकं शब्दं लिखत । (४ तः २)** २

१. स्मरसि ×     २. वृक्षः -

३. बहवः ×     ४. नक्रः -

( मञ्जूषा - मकरः, विस्मरसि, तरुः, अल्पः )

**४) योग्यं पर्यायं चिनुत । (३ तः २)** २

क. धर्माः मानवतागुणं शंसन्ति । (कर्तृवाच्यम् / कर्मवाच्यम्)

ख. त्वं मानवतां ......... । (भजतु / भज)

ग. .............. नद्याः महोदधिं प्रविशन्ति । (सकला / सकलाः)

**शुभं भवतु ✌**